समवयस्का । तत्पर्य्यायः । आलिः २ वयस्या ३ सखी ४ सहचरी ५ । इति जटाधरः ॥
सवयाः, [स्] पुं, (समानं वयो यस्य ।) वयस्यः । इत्यमरः । २ । ८ । १२ ॥ समानवयस्के, त्रि ॥ (यथा रघुः । ५ । ६५ ।
"सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")
सवरः, पुं, सलिलम् । शिवः । इति त्रिकाण्डशेषः ॥
सवर्णः, त्रि, (समानो वर्णोऽस्य । "ज्योतिर्जनपदेति ।"६ । ३ । ८५ । इति समानस्य सः । ) सदृशः । इति हेमचन्द्रः ॥ (यथा, रघुः ।८।५१।
"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः ॥")
समानवर्णः । (यथा, महाभारते ।७।२२।४३ ।
"इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः ।
आयात् सदश्वैः पुरुजित् मातुलः सव्यसाचिनः॥")
तुल्यजातिः । यथा, मनुः ।
"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ॥"
इत्युद्वाहतत्त्वम् ॥
एकस्थानोत्पन्नवर्णः । यथा । सवर्णेनाकदीर्घः । इति संक्षिप्तसारव्याकरणम् ॥
सवर्णा, स्त्री, (समानो वर्णो यस्याः ।) सूर्य्यपत्नी छाया । इति शब्दरत्नावली ॥ ( समानवर्णा स्त्री । यथा, मनुः । ३ । ४ ।
"उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥")
सवहा, स्त्री, त्रिवृता । इत्यमरटीकायां भरतः ॥
सविकाशः, त्रि, विकशितः । प्रफुल्लः । विकाशेन सह वर्त्तमानः ॥
सविता, [ऋ] पुं, (सूते लोकादीनिति । सू + तृच् ।) सूर्य्यः । इत्यमरः । १।३ । ३१ ॥ यथा, कुमारे । ५ । २० ।
"विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥")
तस्य व्युत्पत्तिर्यथा,—
"धीशब्दवाच्यो ब्रह्माणं प्रचोदयति सर्व्वदा ।
सृष्ट्यर्थं भगवान् विष्णुः सविता स तु कीर्त्तितः॥
सर्व्वलोकप्रसवनात् सविता स तु कीर्त्त्यते ।
यतस्तद्देवता देवी सावित्रीत्युच्यते ततः ॥"
इति वह्निपुराणे गायत्रीकल्पो नामाध्यायः ॥
अर्कवृक्षः । इति चामरः । २ । ४ । ८० ॥
सवितृदैवतः, पुं, (सविता दैवतं यस्य ।) हस्तनक्षत्रम् । इति हेमचन्द्रः ॥
सवितृलः, त्रि, सवितृसम्बन्धी । सवितृशब्दात् लप्रत्ययेन निष्पन्नः ॥
सवित्रं, क्ली, (सूयतेऽनेनेति । सू प्रसवे + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३।२।१८४ । इति करणे इत्रः ।) प्रसवकरणम् । इति मुग्धबोधव्याकरणम् ॥
सवित्रियः, त्रि, (सवितुरयमिति । सवितृ + घः।) सूर्य्यसम्बन्धीयः । इति सिद्धान्तकौमुदी ॥
सवित्री, स्त्री, (सूते या । सू + तृच् । ङीप् । ) माता । इति हेमचन्द्रः ॥ (यथा,कुमारे ।१।२४।
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ॥")
गौः । इति केचित् ॥
सविधः, त्रि, (समाना विधास्येदि ।) निकटम् । इत्यमरः । ३ । १ । ६७ ॥ (यथा, कथासरित्सागरे । ५३ । ३० ।
"अग्रे सविधमागत्य राजस्तस्योपविष्टवान्")
समानप्रकारश्च ॥ (यथा, भागवते ।३।३।८ ।
"आसां मुहूर्त्त एकस्मिन् नानागारेषु योषिताम्
सविधं जगृहे पाणीननुरूपः स्वमायया ॥")
सविस्मयः, त्रि, ( विस्मयेन सह वर्त्तमानः । ) विस्मयापन्नः । तत्पर्य्यायः । वीक्षापन्नः २ । इति हारावली ॥
सवेशः,त्रि,(वेशेन सह वर्त्तमानः ।) वेशान्वितः । इति धरणिः ॥ निकटम् । इत्यमरः ।३।१।६७॥
सव्यः, त्रि, (सू प्रेरणे + "माच्छाससिसूभ्यो यः ।" उणा० ४ । १०९ । इति यः । ) वामः । इत्यमरः । ३ । १ । ८५ ॥ (यथा, मनुः । २ । ६३।
"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने॥")
दक्षिणः । (यथा, अनर्घराघवे । ६ । ७० ।
"एकेन सव्यपाणिना विशिखमुत्खाय किमाह रावणः । साधु रे मनुष्यडिम्भ साधु ।"
"सव्यपाणिना दक्षिणहस्तेन ।" इति तट्टीका॥)
प्रतिकूलः । इति हेमचन्द्रः ॥
सव्यः,पुं,(सूते विश्वमिति । सू प्रसवे + "माच्छाससिसूभ्यो यः ।"उणा० ४ । १०९ । इति यः ।) विष्णुः । इति शब्दमाला ॥
सव्यसाची, [न्] पुं, (सव्येन वामेन हस्तेनापि सचति सन्दधाति वाणमिति । सच सन्धाने + णिनिः ।) अर्ज्जुनः । इति हेमचन्द्रः ॥ ( यथा, महाभारते । ४ । १२ । १९ ।
"उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे।
तेन देवमनुष्येषु सव्यसाचीति मां विदुः ॥")
सव्येष्ठः, पुं, ( सव्ये तिष्ठतीति । स्था + कः । "स्थास्थिन्स्थृणाम् ।" ८ । ३ । ९७ । इत्यस्य वार्त्तिकोक्त्या षत्वम् । हलदन्तादित्यलुक् । ) सारथिः । इति हलायुधः ॥
सव्येष्ठा, [ऋ] पुं, सव्ये तिष्ठतीति । स्था + "सव्ये स्थश्छन्दसि ।" उणा० २ । १०२ । इति छन्दसि ऋः । स च डित् ।"स्थास्थिन्स्थृणाम् ।" ८।३।९७ । इति षत्वम् । सप्तम्या अलुक् । ) सारथिः । इत्यमरः । २ । ८ । ६० ॥
सशस्या, स्त्री, (शस्येन सह वर्त्तमाना ।) नागदन्ती । इति रत्नमाला ॥ शस्ययुक्तभूम्यादौ,त्रि॥
सशूकः, पुं, ( शूकेन दयया सह वर्त्तमानः । ) आस्तिकः । इति केचित् ॥
सश्मश्रुः, स्त्री, (श्मश्रुणा सह वर्त्तमाना ।) श्मश्रुयुक्तस्त्री । तत्पर्य्यायः । नरमालिनी २ । इति हेमचन्द्रः ॥ (श्मश्रुविशिष्टे, त्रि ॥)
ससत्त्वा,स्त्री,(सत्त्वेन सह वर्त्तमाना ।)गर्भिणी। इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ९ ।
नदीमिवान्तःसलिलां सरस्वतीं
"नृपः ससत्त्वां महिषीममन्यत ॥")
प्राणियुक्ते, त्रि । यथा, "मनुः । ४ । ४७ ।
'न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ॥'
'न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः ॥'
ससत्त्वेषु प्राणिमत्सु ।" इत्याह्निकतत्त्वम् ॥
ससनं, क्ली, ( सस नाशे + ल्युट् । ) यज्ञार्थपशुहननम् । इत्यमरटीका । २ । ७ । २६ ॥ तस्य रूपान्तर शसनं शसनञ्च ॥
सस्मितः, त्रि, (स्मितेन सह वर्त्तमानः ।) ईषद्धास्ययुक्तः । यथा,—
"सस्मिताननसरोजमङ्गने
रिङ्गमाणमतिलोमकुन्तलम् ।
रोचनोल्लसितभालमस्तु मे
केशवं मनसि शैशवं वपुः ॥"
इत्यनुमितौ जगदीशः ॥
सस्यं,क्ली, (सस स्वप्ने + "माच्छाससिसूभ्यो यः । उणा० ४ । १०९ । इति यः । ) वृक्षादीनां फलम् । यथा,—
"संसनं सीसकं सस्यं सस्तं सास्ना च साध्वसम् ॥"
इत्युष्मविवेकात् । इत्यमरटीकायां भरतः ॥
धान्यम् । यथा, हेमचन्द्रः ।
"धान्यस्तु सस्यं सीत्यञ्च व्रीहिस्तम्बकरिश्च तत्।"
शस्त्रम् । गुणः । इति विश्वः ॥ तस्य प्रशंसा यथा,
"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम् ।
रणात् प्रत्यागतं शूरं सस्यञ्च गृहमागतम् ॥"
इति चाणक्यशतकम् ॥
अन्यत् शस्यशब्दे द्रष्टव्यम् ॥
सस्यकः, पुं, (सस्येन गुणेन परिजातः सम्बद्धः । सस्य + "सस्येन परिजातः ।" ५ । २ । ६८ । इति कन् ।) मणिभेदः । ( यथा, बृहत्संहितायाम् । ७ । २० ।
"हेमकान्तिरथवा शुक्लवर्णः
सस्यकेन मणिना सदृशो वा ॥")
असिः । इति मेदिनी ॥
"सस्यको नालिकेरान्तः सस्याभमणिखड्गयोः॥"
इति हेमचन्द्रः ॥
(शालिः । साधुः । इति काशिका ॥)
सस्यमारी, [न्] पुं, (सस्यं मारयतीति । मृ + णिच् + णिनिः ।) महामूषकः । इति राजनिर्घण्टः ॥ सस्यनाशके, त्रि ॥
सस्यसंवरः, पुं (सस्यैः संव्रियते इति । सं + वृ + "ग्रहवृदृनिश्चिगमश्च ।"३।३।५८ । इति अप् ।) सालवृक्षः । इत्यमरः । २ । ४ । ४४ ॥
सस्यसंवरणः, पुं, (सस्यैः संवरणमस्येति ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥
सस्वेदा, स्त्री, (स्वेदेन सह वर्त्तमाना ।) दूषिता कन्या । इति शब्दरत्नावली ॥ (घर्म्मविशिष्टे, त्रि ॥)